पाठान्तरं यथा,—
"पिरजं सुकषायं स्यान्मधुरं दीपनं हयोः।
स्थावरादिविषघ्नं स्याद्धरितचापरं स्मृतम्॥
शीताङ्गं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्॥"
इति राजनिर्घण्टः।

पेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-चाले अक०-गतौ सक०-सेट्।) ऋ, अपिपेलत् पिपेलतुः। चालः कम्पः। इति दुर्गादासः॥

पेलं, क्ली, (पेलति सदा चलतीति। पेल+अच्।) अण्डकोषः। इति हेमचन्द्रः। ३। २७५॥

पेलवं, त्रि, (पेलं कम्पनं वातीति। वा+कः।) विरलम्। अत्र सावकाशत्वं प्रकारः। इत्यमरभरतौ॥ कृशः। इति हेमचन्द्रः। ६। ११३॥ कोमलम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ४।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अपिपेवत्। ङ, पेवते। इति दुर्गादासः॥

पेशलः, त्रि, (पिश अवयवे+भावे घञ्। पेशं लातीति। ला+कः। यद्वा, पेशोऽस्यास्तीति। सिध्मादित्वात् लच्।) चारुः। (यथा, देवीभागवते। ५। ६। ५६।
"मद्दिवस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः।
जगाम तरसा कामं गजाश्वरथसंयुतः॥")
सुन्दरः। (यथा, रघुः। ६। ४०।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम्॥")
दक्षः। चतुरः। कोमलः। इत्यमरभरतौ॥ (यथा, मुकुन्दमालायाम्। २९।
"इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धि जर्जरम्।
किमौषधैः क्लिश्यसि मूढ दुर्म्मते!
निरामयं कृष्णरसायनं पिब॥")
धूर्त्तः। इति शब्दरत्नावली॥

पेशस्कृत्, पुं, (पेशो रूपान्तरं करोतीति। पेशस्+कृ+क्विप्। "ह्रस्वस्य पिति कृति तुक्।" ६। १। ७१। इति तुगागमः। अनेन गृहीतस्य कीटस्य रूपान्तरं भवति इत्यतोऽस्य तथात्वम्।) कीटविशेषः। कुमिरके इति भाषा। यथा,—
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः।
याति तत्सात्मतां राजन्! पूर्व्वरूपमसंत्यजन्॥"
इति श्रीभागवते। ११। ९। २३॥

पेशिः, पुं, (पिश+"कृपिशीति।" उणा० ४। ११८। इति इन्।) शतकोटिः। इत्युणादिकोषः॥ अण्डे मांसविदले च स्त्री। इति संक्षिप्तसारे उणादिपादः॥

पेशी, स्त्री, (पिश+इन्। वा ङीष्।) अण्डम्। इत्यमरः। २।५।३७॥ (गर्भावेष्टनचर्म्ममयकोषः। यथा, सुश्रुते। १। २६।
"धमनीस्रोतोऽस्थितद्विवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु॥") सुपक्वकलिका। (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"मधुकं बिल्वपेशीश्च शर्करामधुसंयुताः।
अतीसारं निहन्युश्च शालीषष्टिकयोः कणाः॥")
मांसी। खड्गपिधानकम्। मांसपिण्डी। इति मेदिनी। शे, १२॥ (यथा, महाभारते। १। ११५। १९।
"तां स मांसमयीं पेशीं ददर्श जपतां वरः॥")
(अस्याः संख्यावस्थानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति। तासां चत्वारिशतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वंचतुस्त्रिंशत्। एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजान्वन्तरे विंशतिः। पञ्च जानुनि। विंशतिरूर्व्वौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्याञ्चापरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि। पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्ध्वसंनिविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु। ग्रीवायाञ्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः। कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि।
सिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणाम्।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥
स्त्रीणान्तु विंशतिरधिका। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते बाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिसिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति॥ भवति चात्र।
पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये।)
नदीभेदः। पिशाचीविशेषः। राक्षसीविशेषः। इति शब्दरत्नावली॥ (वाद्यविशेषः। यथा, महाभारते। ६। ४२। ३।
"तथा भेर्य्यश्च पेश्यश्च क्रकचा गोविषाणिकाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम्। चूर्णनम्। (यथा, मार्कण्डेये। १४। ८७।
"अयं कृतघ्नो मित्राणामपकारी सुदुर्म्मतिः।
तप्तकुम्भे निपतति ततो यास्यति पेषणम्॥")
खलम्। शतघ्नी। इति शब्दचन्द्रिका॥ तेकाँटाशिल इति भाषा॥

पेषणिः } स्त्री, (पिष्यतेऽनयेति। पिष+करणे अणिः। वा ङीष्।) पेषणशिला। शिल इति भाषा। तत्पर्य्यायः। पेषणी २ पट्टः ३ गृहाश्मा ४ गृहकच्छपः ५। इति शब्दरत्नावली॥ (यथा, मनुः। ३। ६८।
पेषणी
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥")

पेषलः, त्रि, (पेषोऽस्यास्तीति। पेष+सिध्मादित्वात् लच्।) पेशलः। इत्यमरटीकायां भरतरमानाथौ॥

पेषाकः, पुं, (पिष+आकन्।) पेषणिः। इत्युणादिकोषः॥

पेस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अपिपेसत् पिपेसतुः। इति दुर्गादासः॥

पेसलः, त्रि, (पेशलः। पृषोदरादित्वात् शस्य सत्वम्।) पेशलः। इत्यमरटीकायां भरतः॥

पै, शोषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) पायति धान्यमातपेन। इति दुर्गादासः॥

पैङ्गूषः, पुं, (पिङ्गूषे साधुः। अण्।) कर्णः। इति हेमचन्द्रः। ३। २३७॥

पैठरं, त्रि, (पिठरे संस्कृतं पक्वम्। पिठर+अण्।) स्थालीपक्वमांसादि। इत्यमरः। २। ९। ४५॥ (यथा, गो० रामायणे। २। १००। ६३।
"प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः॥")

पैठीनसिः, पुं, मुनिविशेषः। स च स्मृतिगोत्रयोः कारकः। इति पुराणम्॥

पैच्छिल्यं, क्ली, (पिच्छं परपिच्छं भक्षतयास्त्यस्येति। पिच्छ+इन्। ततः ष्यञ्।) भैक्षजीविका। इति त्रिकाण्डशेषः॥

पैतामहं, त्रि, (पितामहस्येदम्। पितामह+"तस्येदम्।" ४।३।१२०। इत्यण्।) पितामहसम्बन्धिधनादि। यथा, कात्यायनः।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्ज्जितम्।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते॥"
बृहस्पतिः।
"पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्ज्जितम्।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्॥"
इति दायभागः॥

पैतृकं, त्रि, (पितुरागतं पितुरिदं वेति। पितृ+ठञ्।) पितृसम्बन्धि। इति शब्दमाला॥ यथा, मनुः।
"ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः॥"
मनुविष्णू।
"पैतृकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्।
न तत् पुत्त्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम्॥"